# Shridhara Suprabhatam

# श्रीधरसुप्रभातम्

## Document Information

Text title : Shridhara Suprabhatam 1

File name : shrIdharasuprabhAtam1.itx

Category : deities_misc, gurudev, shrIdharasvAmI, suprabhAta

Location : doc_deities_misc

Author : Prithviraj Bhalerao (suvrata)

Proofread by : Paresh Panditrao

Description/comments : shrIdharasvAmI stotrANi. shrIdharasandeshaH

Latest update : January 14, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 15, 2023

*sanskritdocuments.org*

# श्रीधरसुप्रभातम्

श्रीधराय नमः ।

प्राचीदिशी प्रगटता शुभरम्यशोभा
भृङ्गःसरागविहगाः विहरन्त्यरण्ये ।
प्रतिष्ठ भो ! गुरुवरं त्वरितं प्रसीद
हे श्रीधर श्रुतिशिरस्तव सुप्रभातम् ॥ १॥

वेधः पुरारिहरयः सकला दिवौकाः
ध्यायन्ति शान्तमुनयस्तु प्रणम्य तुभ्यम् ।
गन्धर्वकिन्नरगणा मुदिता वदन्ति
हे श्रीधर श्रुतिशिरस्तव सुप्रभातम् ॥ २॥

वीणासु वेणुकलनादितमाश्रयोऽयं
गायन्ति भक्तिरसतः सुजनाः सुतन्त्र्या ।
अर्घ्याणि ब्राह्मणजनाः किल चार्पयन्ति
हे श्रीधर श्रुतिशिरस्तव सुप्रभातम् ॥ ३॥

गोष्ठेषु किङ्किणिरवेषु गवाः सवत्साः
दुग्धं श्रवन्ति मृदुकोमलभावयुक्ताः ।
गायन्ति सान्द्रमधुरं शुककोकिलावैं
हे श्रीधर श्रुतिशिरस्तव सुप्रभातम् ॥ ४॥

श्रौतः स्वनाः हवनमण्डपनादितास्ते
आल्हादयन्ति सुजनान् गुरुपादनिष्ठान् ।
सौरभ्यपूर्णपवनाः विचरन्ति भूमौ
हे श्रीधर श्रुतिशिरस्तव सुप्रभातम् ॥ ५॥

गङ्गाजलत्रिदलचन्दनचन्द्रगन्धा
पुन्नागचम्पकशमीतुलसीप्रवालाः ।
भक्ताहितास्तव पुरः सुभगोपचाराः

हे श्रीधर श्रुतिशिरस्तव सुप्रभातम् ॥ ६॥

श्रीपादरेणुशुभकुङ्कुमरागयुक्तान्
एलानुशीरमृगनाभिमदाक्त चूर्णान् ।
श्रीयक्षकर्दमयुतान्तु गृहाण गन्धान्
हे श्रीधर श्रुतिशिरस्तव सुप्रभातम् ॥ ७॥

गुञ्जासुकञ्जबकुलादि सुवर्णमालान्
गुञ्जारवप्रसवपुष्पयुतां च रम्यान् ।
कुन्दारविन्दमकरन्दमिलिन्दयुक्तान्
हे श्रीधर श्रुतिशिरस्तव सुप्रभातम् ॥ ८॥

नीहारबिन्दुयुतमौक्तिककान्तिभासान्
सेवन्तिकाकनकचम्पकजातियुक्तान् ।
भो स्वीकुरु प्रणवतः श्रवणप्रवीर
हे श्रीधर श्रुतिशिरस्तव सुप्रभातम् ॥ ९॥

कृष्णागुरुप्रचुरगुग्गुलधूपधूमान्
कर्पूरचन्दनसुगन्धितधूम्रवीचिन् ।
दीपांश्च पश्य विविधान्मणिहैमपीठान्
हे श्रीधर श्रुतिशिरस्तव सुप्रभातम् ॥ १०॥

भक्त्या समर्पितमहो नवनीतमग्र्यं
क्षीरं तथा च ससित धृतकन्दयुक्तम् ।
नानाफलानि रुचिराणि च ह्यर्पितानि
हे श्रीधर श्रुतिशिरस्तव सुप्रभातम् ॥ ११॥

रम्भाफलानि शुचिगन्धसमन्वितानि
आरक्तसान्ध्यमधुवर्णरसान्वितानि ।
आम्रादि खर्जुरयुतान्यमृतप्रदानि
हे श्रीधर श्रुतिशिरस्तव सुप्रभातम् ॥ १२॥

वाताम्बुहेमकदलीबदरीफलानि
सीताफलानि रघुनाथफलान्वितानि ।
औदुम्बरादि मधुदाडिमबिल्वकानि
हे श्रीधर श्रुतिशिरस्तव सुप्रभातम् ॥ १३॥

जाम्बीरजम्बुपनसादि महाफलानि
  द्राक्षायुतानि मधुखाण्डवप्रेयकानि ।
श्रीनारिकेलफलवारि च सेव्यतां वै
  हे श्रीधर श्रुतिशिरस्तव सुप्रभातम् ॥ १४॥

मुक्ताः सरोजसदनाद् भ्रमराः प्रभाते
  चित्तं तु बद्धमभवध्यपि चेत्सुतृप्तम् ।
त्वत्पादपद्ममधुभुग् मम मानसोऽयं
  हे श्रीधर श्रुतिशिरस्तव सुप्रभातम् ॥ १५॥

निद्रां निहाय शुचिमङ्गलदर्शनं ते
  दत्त्वा च स्वीकुरु गुरो कृपया हि सेवाम् ।
भक्ताः नमन्ति ललितस्मितरागयुक्ताः
  हे श्रीधर श्रुतिशिरस्तव सुप्रभातम् ॥ १६॥

इति श्री पृथ्वीराज भालेरावः अथवा सुव्रतविरचितं
श्रीधरसुप्रभातं सम्पूर्णम् ।

Proofread by Paresh Panditrao

*Shridhara Suprabhatam*

pdf was typeset on January 15, 2023

Please send corrections to *sanskrit@cheerful.com*